तथा च पाद्मे ।
"संक्रान्त्यां माघमासस्य साधिवासिततण्डुलान् ।
निवेद्य विष्णवे भक्त्या इमं मन्त्रमुदीरयेत् ॥
त्वयि तुष्टे जगत् सर्व्वमन्नेन प्रभविष्यति ।
रक्ष सर्व्वं जगन्नाथ ! गृह्यतां पिष्टकं शुभम् ॥
ब्राह्मणान् भोजयेत् भक्त्या देवदेवपुर:स्थितान् ॥"
अभ्यर्च्य भगवद्भक्तानित्यादि ॥
"नवेन वाससावेष्ट्य दूर्व्वासर्षपपुष्पकै: ।
पूजयित्वाभिमन्त्र्येण कृष्णस्त्वामभिरक्षतु ॥
पुन: प्रभाते देवेशं प्रलिपेद्गन्धचन्दनै: ।
वस्त्रालङ्कारमाल्यैश्च पूजयित्वा यथाविधि ॥
नीराजयित्वा देवेशं तण्डुलानधिवासितान् ।
स्थालीषु पाकपात्रेषु मधुखण्डाज्यमिश्रितान् ॥
पङ्क्तिश: स्थापयेदग्रे गन्धपुष्पाक्षतान्वितान् ।
सपूपं पायसं कृत्वा दद्याद्वै चक्रपाणये ।
दशवर्णकपिष्टञ्च विष्णो: प्रियतरं परम् ॥
ॐ जीवनं सर्व्वभूतानां जनकस्त्वं जगद्गुरो ! ।
त्वन्मया: शालिनो ह्येते त्वयैव जनिता: प्रभो ! ॥
लोकानुग्रहणार्थाय गृहीत्वा चित्रविग्रहम् ।
तव प्रीत्यै कृतानेतान् गृहाण परमेश्वर ! ॥
त्वयि तुष्टे जगत् सर्व्वमनेन प्रभविष्यति ।
स्वाहाकारस्वधाकारवषट्कारा दिवौकसाम् ॥
आप्यायना भविष्यन्ति तेनैवाप्यायितं जगत् ।
रक्ष सर्व्वं जगन्नाथ ! तन्मयं सचराचरम् ॥
इति संप्रार्थ्य देवेशं शालींस्तान् विनिवेदयेत् ॥"१०॥
अथ दोलयात्रा ।
"फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमम् ।
यत्र क्रीड़ति गोविन्दो लोकानुग्रहणाय वै ॥
प्रत्यर्च्चां देवदेवस्य गोविन्दाख्यान्तु कारयेत् ।
फलगूत्सवं प्रकुर्व्वीत पञ्चाहानि त्र्यहाणि वा ॥
फाल्गुन्या: पूर्व्वतो विप्राश्चतुर्द्दश्यां निशामुखे ।
वह्न्युत्सवं प्रकुर्व्वीत दोलमण्डपपूर्व्वत: ॥"
पाद्मे ।
"पौर्णमास्यां समारभ्य पञ्चम्याञ्च समाप-
येत् ॥"११॥
अथ मदनभञ्जिका यात्रा ।
"वासन्तिकां समाख्यास्ये यात्रां मदनभञ्जि-
काम् ।
यस्यां कृतायां दृष्टायां प्रीणाति पुरुषोत्तम: ॥
चैत्रशुक्लत्रयोदश्यामाहरेत्तत् समूलकम् ।
देवस्याग्रे विरचिते मण्डपे साधिवासिते ॥"१२॥
इति यात्रातत्त्वम् ॥
देव्या: षोड़शप्रकारोत्सव: । यथा,—
"वैशाखे मत्स्ययात्रा च चन्दनागुरुकल्पना ।
ज्यैष्ठे महास्नानयात्रा अम्बुवाचीदिनत्रयम् ॥
आषाढ़े रथयात्रा च दिग्दिनव्यापिनी परा ।
श्रावणे जलयात्रा च वस्त्रभूषणचामरै: ॥
भाद्रे यात्रा धूननाख्या चण्डिकाया दिनत्रयम् ।
आश्विने च महापूजा यात्रा यज्ञबलिप्रिया ॥
कार्त्तिके दीपयात्रा च नवान्नमग्रहायणे ।
पौषे चाङ्गरागयात्रा वस्त्रालङ्कारभूषणै: ॥
माघे मासि महादेवी रटन्ती च चतुर्द्दशी ।
दोलाकेलि: फाल्गुने च चैत्रे यात्रा चतुष्टयी ।
दूतीयात्रा रासयात्रा वासन्ती नीलयात्रिका ।
एवं यात्रा मया प्रोक्ता षोड़शी भवमोचनी ॥"
इति वामकेश्वरतन्त्रे ५४ पटल: ॥
(रोगिदर्शनार्थं भिषजां यात्राविवरणम् । यथा,
"इदानीं निर्गमे पुत्त्र ! प्रवेशे वा गृहस्य च ।
शुभाशुभानि सर्व्वाणि वक्ष्यामि शकुनानि च ॥
राजा गजो द्विजमयूरकखञ्जरीटा-
श्चाष: शकुन्तरजक: सितवस्त्रयुक्त: ।
पुत्त्रान्विता च युवती गणिका च कन्या
श्रेय: सुखाय यशसां प्रतिदर्शयन्ति ॥
नटाश्चाशो भासहारीतचक्रौ
भारद्वाजोच्छिक्करञ्जागसंज्ञ: ।
एते श्रेष्ठा दक्षिणे वाथ सव्ये
वेद्यावेशे निर्गमे श्रेयसे च ॥
सर्पोलूकौ वानर: शूकरश्च
गोधा कच्छ: शकलाश: शशश्च ।
एते रिष्टा निर्गमे वा प्रवेशे
कार्य्याघातौ नोपकारेषु शस्ता: ॥
मृगो वा पिङ्गलो वापि प्रशस्ता दक्षिणे सदा ।
निर्गमे वा प्रवेशे च दक्षिणा: शुभदायका: ॥
एको वा त्रीणि वा पञ्च सप्त वा नवसंख्यया ।
भाग्यकाले नराणान्तु मृगा यान्ति प्रदक्षिणा: ॥
शिखिहयगजगोधारासभौ भृङ्गराजो
मुखरपिककपोतौ पोतकी शूकरी वा ।
तदनुविहगराजो मङ्गलाशंसिन: स्यु-
र्वदति शकुनवेत्ता वामतो निर्गमे व: ॥
तित्तिरि: कुरर: क्रौञ्च: सारसाभासशूकर: ।
वामे तु शुभशंसी च निर्गमे कार्य्यसिद्धये ॥
काको दक्षिणत: श्रेष्ठो निर्गमे शुभदायक: ।
प्रवेशे गदित: श्रेष्ठो वामत: कृष्णवायस: ॥
जालको हि शशकोऽपि कर्कटो-
कौर्भनश्च गदितं न सुखाय ।
न शुभदर्शना अमी भवेयु:
सर्पगोधाकृकलाशविड़ाला: ॥
दर्शनं हितकरं प्रवदन्ति
खञ्जरीटमरालच्छिक्कराणाम् ।
वामत: शुभकरा: प्रवदन्ति
दार्व्वाघाटवराटकशुकश्च ॥
इति शुभाशुभशकुनानि ॥"
इति हारीते द्वितीयस्थाने सप्तमेऽध्याये ॥ * ॥
तथा च ।
"शवकाष्ठपलाशानां शुष्कानां पथि सङ्गमा: ।
नेष्यन्ते पतितान्तस्थदीनान्धरिपवस्तथा ॥
मृदुशीतोऽनुकूलश्च सुगन्धिश्चानिल: शुभ: ।
खरोष्णोऽनिष्टगन्धश्च प्रतिलोमश्च गर्हित: ।
ग्रन्थ्यर्व्वुदादिषु सदा छेदशब्दश्च पूजित: ।
विद्रध्युदरगुल्मेषु भेदशब्दस्तथैव च ॥
रक्तपित्तातिसारेषु रुद्धशब्द: प्रशस्यते ।
एवं व्याधिविशेषेण निमित्तमुपधारयेत् ॥
तथैवाक्रुष्टहाकष्टमाक्रन्दरुदितस्वना: ।
छर्द्दनं वातपुरीषाणां शब्दो वै गर्द्दभोष्ट्रयो: ॥
प्रतिषिद्धं तथा भग्नं क्षुतं स्खलितमाहतम् ।
दौर्म्मनस्यञ्च वैद्यस्य यात्रायां न प्रशस्यते ॥"
इति सुश्रुते सूत्रस्थाने २६ अध्याय: ॥)

यादईश:, पुं, ( यादसां जलानां जलजन्तूनां वा ईश: । ) समुद्र: । इति हेमचन्द्र: । ४ । १३६ ॥

याद:, [स्] क्ली, (यान्ति वेगेनेति । या + असुन् । बाहुलकात् दागमश्च ।) जलजन्तु: । इत्यमर: । १।१०।२० ॥ ( यथा, भगवद्गीतायाम् ।१०।२६।
"अनन्तश्चास्मि नागानां वरुणो यादसा-
महम् ॥"
जलम् । इति निघण्टु: । १ । १२ ॥ )

याद:पति:, पुं, ( यादसां पति: । ) समुद्र: । इत्यमर: ।१।१६।२०॥ वरुण: । इत्यजयपाल: ॥

यादव:, पुं, ( यदोरपत्यम् । यदु + अण् । ) श्रीकृष्ण: । इति शब्दरत्नावली ॥ ( यथा, भगवद्गीतायाम् । ११ । ४१ ।
"सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण ! हे यादव ! हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात् प्रणयेन वापि ॥")
ययातेर्ज्येष्ठपुत्त्रो यदुस्तस्य वंश: । यथा,—
"ययातेर्ज्येष्ठपुत्त्रस्य यदोर्वंशं नरर्षभ ! ।"
इत्युपक्रम्य ।
"माधवा वृष्णयो राजन् यादवाश्चेति संज्ञितम् ॥"
इति श्रीभागवते ६ स्कन्धे २३ अध्याय: ॥
(यदुसम्बन्धिनि, त्रि । यथा, भागवते । ११।१।३ ।
"मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं
यद्यादवं कुलमहो अविसह्यमास्ते ॥")

यादवी, स्त्री, (यदोरियमिति । यदु + अण् । ङीप् ।) दुर्गा । इति त्रिकाण्डशेष: ॥ ( यदुवंशीयस्त्री-सामान्ये । यथा, महाभारते । १ । ६५ । १३ ।
"प्राचीन्वान् खल्वश्मकीमुपयेमे यादवीं तस्या-
मस्य जज्ञे संयाति: ॥")

यादसांनाथ:, पुं, ( यादसां जलजन्तूनां नाथ: । षष्ठ्या अलुक् । ) वरुण: । इति हलायुध: ॥

यादसांपति:, पुं, ( यादसां जलजन्तूनां पति: । षष्ठ्या अलुक् ।) समुद्र: । इत्यमर: । १।१।६४ ॥ वरुण: । इति मेदिनी । ते, २३२ ॥ ( यथा, देवीभागवते । ३ । ६ । ३५ ।
"अश्विनौ वसवस्त्वष्टा कुबेरो यादसांपति: ॥"
क्वचित् विशेषणमपि । यथा, मार्कण्डेये ।२२।११।
"यावदन्तर्जले देवं वरुणं यादसांपतिम् ॥")

यादृक्, [श्] त्रि, (य इव दृश्यते । दृश् + "त्यदादिषु दृशोऽनालोचने कञ्च ।" ३।२।६० । इति चकारात् क्विन् । "आ सर्व्वनाम्न: ।" ६।३।६१ । इत्याकारादेश: । ) य इव दृश्यते स: । इति मुग्धबोधव्याकरणम् ॥ येमन इति भाषा । (यथा, भागवते । ४ । २६ । ६४ ।
"नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम् ।
कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥")

यादृक्ष:, त्रि, ( य इव दृश्यते यमिव पश्यति वा । दृश् + "दृशे: क्सश्च वक्तव्य: ।" ३।२।६० । इति